## स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । (३९/७०१)

स्तोक अन्तिक दूर इत्येवमर्थाः [1]शब्दाः कृच्छ्रशब्दश्च पञ्चम्यन्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति । स्तोकान्मुक्तः[2] । अन्तिकादागतः । [3]अभ्याशादागतः । [4]दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । कृच्छ्राल्लब्धः । 'पञ्चम्याः स्तोकादिभ्यः' (६.३.२/९५९) इत्यलुक् ।

[८०] [5]शतसहस्रौ परेणेति वक्तव्यम् ।

शतात् परे [6]परश्शताः । सहस्रात् परे [7]परस्सहस्राः । राजदन्तादित्वात् (२.२.३१/९०२) [8]परनिपातः । निपातनात् सुडागमः ॥

## सप्तमी शौण्डैः । (४०/७१७)

[9]सप्तम्यन्तं शौण्डादिभिः [10]सह समस्यते, [11]तत्पुरुषश्च समासो भवति । अक्षेषु शौण्डः अक्षशौण्डः । [12]अक्षधूर्तः । अक्षकितवः ।

[13]शौण्ड । धूर्त । कितव । [14]व्याड । प्रवीण । संवीत । अन्तर् । अन्तःशब्दस्त्वत्राधिकरणप्रधान एव पठ्यते । [15]अधि । पटु । पण्डित । कुशल । चपल । निपुण । [16]वृत्तौ [17]प्रसक्तिक्रियाया अन्तर्भावादक्षादिषु अधिकरणे सप्तमी ॥

## सिद्धशुष्कपक्वबन्धैश्च । (४१/७१८)

सप्तमी इति वर्तते । सिद्ध शुष्क पक्व बन्ध इत्येतैः[18] सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । [19]साङ्काश्यसिद्धः । [20]काम्पिल्यसिद्धः । [21]शुष्क–आतपशुष्कः । छायाशुष्कः । [22]पक्व–स्थालीपक्वः । कुम्भीपक्वः । बन्ध–चक्रबन्धः[23] । बहुलग्रहणस्यैवायमुदाहरणप्रपञ्चः (२.१.३२/६९४) ॥

## ध्वाङ्क्षेण क्षेपे । (४२/७१९)

ध्वाङ्क्षेण इत्यर्थग्रहणम् (म भा. १. ३८१) । ध्वाङ्क्षवाचिना सुबन्तेन सह सप्तम्यन्तं [24]सुबन्तं समस्यते, [25]तत्पुरुषश्च समासो भवति क्षेपे गम्यमाने । तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । अनवस्थितः इत्यर्थः । तीर्थकाकः । तीर्थवायसः[26] । [27]क्षेपे इति किम् ? तीर्थे ध्वाङ्क्षस्तिष्ठति ॥

---

1. शब्दाः नास्ति ह. 2. अल्पान्मुक्तः इत्यधिकम् क.ड.इ.फ.ह. 3. उदाहरणमिदं नास्ति ह. 4. उदाहरणमिदं नास्ति ब. इ. 5. शत–सुडागमः नास्ति इ.ग.ह.फ, शतं सहस्रं ड. 6. परःशतं ड, परःशतानि कार्याणि क. 7. परःसहस्रं ड. 8. पूर्वनिपातः क. 9. सुप् सुपेति वर्तते इत्यधिकम् ड. 10. सह नास्ति फ. 11. तत्पुरुषसंज्ञकः ह. 12. अक्षेषु धूर्तः इत्यधिकम् ह, अक्षकितवः नास्ति ड. ह. 13. शौण्ड–सप्तमी नास्ति ग. 14. संव्याड क. फ, व्याध ह, व्याल, सत्पिण्ड, पटु, मृदु इत्यधिकम् ह. 15. मृदु क. 16. शौण्डादिवृत्तौ ह. 17. वृत्तिक्रियायाः फ. 18. शब्दैः इत्यधिकम् ड. 19. सांकाश्ये सिद्धः इत्यधिकम् अ. ह. 20. काम्बील्ये सिद्धः काम्बील्यसिद्धः फ. ह, कम्भोजसिद्धः इत्यधिकम् ड. फ. 21. शुष्क नास्ति फ. 22. पक्व नास्ति फ. 23. चारकबन्धः इत्यधिकम् क.ड.फ.ह, चातकबन्धः इत्यधिकम् इ. 24. सुबन्तं नास्ति क. ड. फ. 25. तत्पुरुषसंज्ञकश्च ह. 26. तीर्थकाषः इत्यधिकम् ग. 27. अनवस्थिते क.